International Journal of Sanskrit Research 2023; 9(3): 36-38

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 36-38
© 2023 IJSR
www.anantaajournal.com
Received: 05-04-2023
Accepted: 16-05-2023

**Valthaje Ganesha Prasad Bhat**
Assistant Professor,
Department of Rigveda, S.V. Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Valthaje Ganesha Prasad Bhat**
Assistant Professor,
Department of Rigveda, S.V. Vedic University, Tirupati, Andhra Pradesh, India

# आम्भृणीसूक्ते दुर्गातत्त्वविचारः

**Valthaje Ganesha Prasad Bhat**

## सारांश
"वेदात्सर्वं प्रसिद्ध्यति" वचनात् ज्ञायते यत् वेदे जगत्कारणलयादि सर्वविषयाः अन्तर्निहिताः इति। तत्र ऋग्वेदे मन्त्रबाहुल्यात् जन्मादि मरणान्तं तथा इहपारलौकिकादि बहवः विषयाः वर्णिताः सन्ति। अत्यन्त प्राचीन तथा संस्कृतभाषया प्रतिपादनात्वात् आधुनिकैः सरलतया तत्र वर्णित अन्तर्निहितविषयाः ज्ञातुं असमर्थाः। उच्यते खलु "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति वेदे वर्णितविषयाणां ज्ञानार्थं इतिहास तथा पुराणादीनामध्ययनेन तत्रस्थ ज्ञानं सरलतया साक्षात्कर्तुं शक्यते। मयात्र तादृशः लोके प्रसिद्धाः सर्वैराराध्याः दुर्गादेव्याः तत्वानि वेदादि ग्रन्थात् संगृह्य जनमानसं प्रति प्रदातुं प्रयत्नं कृतमस्मि।

**कुटशब्दः** आम्भृणीसूक्ते दुर्गातत्त्वविचारः, अन्तर्निहितविषयाः, ऋग्वेदे मन्त्रबाहुल्यात्

## प्रस्तावना
भगवत्स्तोत्रपरकाः अपौरुषेयाः प्रभुसंहिताः। ऋग्वेदादयः चतुर्वेदाः भारतीयसंस्कृतेः मूलस्तम्भाः विराजन्ते। तादृशानां विशिष्टानां वेदानाम् अवबोधनार्थं षडङ्गानि वेदभाष्यग्रन्थराजाश्च राराजन्ते। विश्वसाहित्ये वेदविज्ञानस्य परमोन्नतं स्थानं विद्यते। सामाजिकाः सांस्कृतिकाः वैज्ञानिकाश्च बहवः अंशाः वेदेषूपनिबद्धाः विश्वप्राणिहिताय रक्षणाय, योगाय, क्षेमाय, च कालत्रयेऽपि अबाधकत्वेन विराजन्ते।एवं प्रपञ्चवाङ्मयरङ्गमञ्चे मानवानां सर्वतोमुखविकासाय तत्त्वोद्योतकाः वेदाः।

तत्र ऋग्वेदे महाकाली-महालक्ष्मी-महासरस्वतीस्वरूपात्मिकायाः दुर्गापरमेश्वर्याः वैशिष्ट्यप्रतिपादकानि नैकानि सूक्तानि विद्यन्ते। विशिष्य ऋग्वेदे दशममण्डले पञ्चविंशत्युत्तरैकशततमे (मं,१० – सू,१२५) अम्भृणीसूक्ते मुख्यतया दुर्गातत्त्वविचारः दरीदृश्यते।

अम्भृणी वागात्मानं तुष्टाव इति निरुक्तशास्त्रे अहमष्टौ वागाम्भृणी तुष्टावात्मानं द्वितीयाजगती इति अनुक्रमणिकायाम् अहं वाक्सूक्तम् इति। बृहद्देवताग्रन्थे च अम्भृणीविचारे वरीवर्ति। अम् बिभर्ति नयति च इति व्युत्पत्या अम्भृणीशब्दस्य महालक्ष्मीरित्यर्थः। एतदेव स्पष्टं समुद्घोषितं पैङ्गश्रुतौ – श्रीभूदुर्गाम्भृणी ह्रीश्च महालक्ष्मीश्च दक्षिणा इति। सकलवेदानां मुख्याभिमानिनी महालक्ष्मीस्वरूपा दुर्गा एव अम्भृणीसूक्तस्य मुख्यप्रतिपाद्यदेवता ।

सूक्तेऽस्मिन् अम्भृणौ अष्टमन्त्राः राराजन्ते । तत्र च द्वितीयमन्त्रः जगतीछन्दसि, अवशिष्टाः सप्तमन्त्राः त्रिष्टुप् छन्दसि च विद्यते। ब्रह्मादिदेवानाम् अखिलाण्डकोटिब्रह्माण्डानां च सृष्टिस्थितिप्रलयकर्त्री, ऐश्वर्यप्रदात्री, जगन्नियन्त्री, राष्ट्राभिमानिनी, इहलोकद्रव्यदात्री, मोक्षदात्री च दुर्गैव। सायणभाष्येऽपि सूक्तस्यास्य विवरणं, दुर्गायाः ब्रह्मरुद्राद्युत्तमत्वेन

प्रतिपादितमस्ति। अम्भृणीसूक्तस्यैव देवीसूक्तमित्यपि नामान्तरं विद्यते। अस्य सूक्तस्य अम्भृणीदेवताकत्वात् अम्भृण्याश्च दुर्गामूर्तित्वात् वाङ् नाम्नी दुर्गैव प्रकीर्तिता। सूक्तस्यास्य सायणमते इत्थं दुर्गातत्त्वविचारः निरूप्यते –

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥
(ऋ–१०–१२५–१)

अहमेव रुद्रैः वसुभिः आदित्यैः विश्वदेवैः स्तुतिरूपेण चरामि। अहमेव मित्रावरुणैः इन्द्राग्नी अश्विनौ च उभावपि हविषा बिभर्मि।सर्वदेवता हविःसम्प्रदानं मत्पूर्वकं भवति।अहं एकादशरुद्रैः, अष्टवसुभिः, द्वादशादित्यैः, दशविश्वेदेवैस्सह सञ्चरामि।अहं मित्रावरुणौ इन्द्राग्नी अश्विनौ च बिभर्मि।

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३यजमानाय
सुन्वते॥ (ऋ–१०–१२५–२)

अहं सोमलताभिमानिनं चन्द्रं, त्वष्टारं, पूषणं, भगमपि पालयामि। त्रिलोकेष्वपि संस्थितं सोमरसं मह्यं समर्पयितेभ्यः ब्रह्मरुद्रेन्द्रादिभ्यः यज्ञशीलेभ्यः यागफलरूपं महदैश्वर्यम् अतिशयेन प्रददामि। चोरादिभयं निवार्य रक्षामि, वृध्यादिना पोषयामीत्यभिप्रायः।

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा
यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥
(ऋ–१०–१२५–३)

अहं भूरूपेण राष्ट्रस्याभिमानिनी शोभे। धनधान्यरत्नादीनां प्रापयत्री, तथा यज्ञार्हाणां वसूनां देवानां वा सङ्गमयित्री आद्यकर्त्री।ब्रह्मरुद्रेन्द्रादिजगन्नियन्तारं मामेव सकलदेवताः स्वस्वयोग्यतानुसारं सकलप्राणिनाम् ऐश्वर्यप्रदातृत्वेन बहुभावेन स्तुवन्ति।एवमस्मिन्मन्त्रे महालक्ष्मीतत्त्वमभिवर्णितम्।

मयासो अन्नमत्ति यो विपश्यति यः प्राणति य ईं
शृणोत्युक्तम्।
अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते
वदामि॥ (ऋ–१०–१२५–४)

ये संस्काररहिनाः मद्विषयकज्ञानशून्याः सन्तः सर्वान्तर्यामिणीं माम् अजानन्तः उपक्षियन्ति, मदुक्ततत्वात् वैपरीत्येन पश्यन्ति । जीवनमात्रं कृत्वा तिष्ठन्ति, मदुक्तं सकलं तत्त्वं शिष्यत्वेन श्रद्धया न शृण्वन्ति, माम् अवमानयन्ति, ते सर्वे शीघ्रातिशीघ्रं नाशमेष्यन्ति। तस्मात्कारणात् मत्तत्वं श्रद्धया शिष्यभावेन ज्ञात्वा मदनुग्रहं प्राप्नुयात्।

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं
सुमेधाम्॥ (ऋ–१०–१२५–५)

देवैरिन्द्राभिरपि सेवितं वचनम् अहमेव स्वयमिदं प्रवदामि यत् – यं पुरुषं रक्षितुमहं वाञ्छामि तं पुरुषं सर्वेऽभ्योऽधिकं करोमि। तमेव ब्रह्माणं स्रष्टारं करोमि। तमेव जीवं शोभनप्रज्ञं प्रकरोमि। अर्थात् दुर्गापरमेश्वरी सर्वसमर्थेत्यभिप्रायः। एवमत्र महासरस्वत्याः माहात्म्यमभिवर्णितम् अस्मिन् मन्त्रे।

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश॥
(ऋ–१०–१२५–६)

पुरा त्रिपुरविजयसमये महादेवस्य रुद्रस्य चापमहं कर्णपर्यन्तम् आततं करोमि। ब्रह्मणः पञ्चमुखच्छेत्तारं जगत्संहारकं रुद्रं प्रलयकाले भीषयितुं न हन्तुमेव मम धनुः विस्तारयामि। स्तोतृजनार्थं एतदुदाहरणं भवति दुर्गासप्तशतीपाठः।तथैव ममोपासकेभ्यः योग्यजीवेभ्यः करुणया कैवल्यमपि प्रददामि। अहमेव दिवञ्च, पृथिवीञ्च, संरक्षणार्थमन्तर्यामितया तदन्तः प्रविष्टवती, एवमत्र माहाकाल्याः माहात्यं अभिवर्णितमस्मिन्मन्त्रे।

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वश्न्तःसमुद्रे।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि
(ऋ–१०–१२५–७)

अहं जगतः प्रपितामहं चतुर्मुखब्रह्माणं सर्वजीवोत्तमत्वेन सत्यलोकनायकत्वेन च प्रसुवे। समुद्रे, अन्तरिक्षे, अप्सु, अम्मयेषु, देवशरीरेषु मम कारणं भूतं ब्रह्मचैतन्यं वर्तते। ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि।

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यै तावती महिना सं बभूव।।
(ऋ–१०–१२५–८)

सर्वाणि भुवनानि स्रष्टुं, पालयितुं, रक्षितुं, संहर्तुं, च प्रचण्डमारुतेव अहमेव स्वयमधिष्कर्त्री* कूटस्थब्रह्मचैतन्यरूपाहं सर्वजगदात्मना सम्भूतासि एवमहं ब्रह्मरुद्रेन्द्रादिभ्यः परतमा राराजन्ते। एवमत्राष्टकमन्त्रैः अम्भृणीसूक्तेन महाकाली-महालक्ष्मी-

महासरस्वतीस्वरूपात्मिकायाः दुर्गापरमेश्वर्याः तत्त्वविचारः संक्षेपेण विहिताः॥

## उपसंहार

यद्यपि सूक्तमिदं ऋग्वेदे विद्यते परन्तु दुर्गासप्तशत्याः पाठक्रमेपि अस्य सूक्तस्य उपयोगः दरीदृश्यते। श्री मार्कण्डेयपुराणान्तर्गत सावर्णिके मन्वन्तरे देवीमाहात्म्ये दुर्गातत्वं महाकाली-महालक्ष्मी-महासरस्वती चरित्रत्रयेण दरीदृश्यते,एवं ललितासहस्रनाम स्तोत्रे अपि- "वाग्वादिनी वामकेशी वह्निमण्डलवासिनी" तथैव षष्ठमण्डलस्य 61 सूक्ते 14 मन्त्रात्मिका सरस्वतीस्तुतिं विद्यते। पञ्चममण्डलस्य 87 सूक्तस्य परिशिष्टे दुःखदारिद्योपशमनपूर्वकं श्रीप्राप्त्यर्थं श्रीसूक्तं लभ्यते। एवं प्रकारेण ऋग्वेदे महाकाली-महालक्ष्मी-महासरस्वत्याः वैशिष्ट्यं वर्णितम्। अनेन समाजस्य त्रिविध तापोपशमनार्थं, त्रिकरणशुद्ध्यर्थं, सर्वेषां सर्वविध सुखसमृद्धिं कामयमानः विरम्यते विस्तरात्।।

## उपयुक्तग्रन्था


1. ऋग्वेदसंहिता-संपादकः-श्रीपाद दामोदर सातवळेकर, पारडी, गुजरात, वर्ष-1973
2. ऋग्वेदभाष्यम्-प्रकाशकः-विश्वेश्वरानन्द वैदिकशोधसंस्थानम्, होशियारपुरम्, वर्ष 2021
3. ऋग्वेदभाष्यम्-संपादकः- हिच् पि वेङ्कटराव, मैसूर, वर्ष-1953
4. दुर्गासप्तशती-गीताप्रेस, गोरखपुर, वर्ष-2000
5. ललितासहस्रनाम स्तोत्रम्- गीताप्रेस, गोरखपुर, वर्ष-2000